श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

## श्री कूरं तिरुवाळि नरसिंह दासेन कृता

# ॥ श्री नवरत्नमाला ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री नवरत्नमाला ॥

काषाय दण्ड मुद्धृत्य विलसच्छ्रीमदाण्डवः।
श्रीमुष्ण जनितः श्रीमान् श्रेष्ठो वैष्णव पालने ॥ **1** ॥

ज्ञानेन यज्ञ तपसा शिष्यान् शास्ति च यो गुरुः।
तमहं शिरसा वन्दे श्रीमदाण्डव मामुनिम् ॥ **2** ॥

वेद वेदान्त विद्यासु निष्णातो मुनिपुङ्गवः।
सतां सदसि रक्तोऽयं रङ्गरामानुजो यतिः ॥ **3** ॥

दर्शने सूर्यवत् भाति भाषणे स्वामिदेशिकः।
सौहार्दे भाष्यकारोऽयं श्रीमदाण्डव मामुनिः ॥ **4** ॥

प्रपञ्चे सर्व दिग्भागे वर्तन्ते शिष्य कोटयः।
ते सर्वे स्वामिनं यान्ति जन्म साफल्यसिद्धये ॥ **5** ॥

कल्याण कार्य कर्तारं साधु सज्जन पोषकम्।
मानवोद्धरणे मग्नं यतिराजमहं भजे ॥ **6** ॥

वेद वेदान्त विदुषं पादुकाराधने रतम्।
ज्ञानिनामग्रगण्यं तम् अपरं देशिकं भजे ॥ **7** ॥

कायेन मनसा वाचा नित्यं पादाऽभिवन्दनम्।
त्वय्यर्पितमनो बुद्धिं देहि मे मुनिपुङ्गव ॥ **8** ॥

वन्दे वैष्णव पोषकं यतिवरं सर्वार्थसिद्धिप्रदम्
शिष्याणां हृदयङ्गमं गुणनिधिं शास्त्रार्थ सद्बोधकम्।

दीनानां हितकारकं शुभकरं लोके हितार्थ प्रदम्
आरुद्रा जनितं मुनित्रयमुनिं रङ्गेति नामाङ्कितम्॥ 9 ॥

॥ इति श्री नवरत्नमाला समाप्ता ॥